# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-5)(New)** | **प्रश्नपत्रम् – 6** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.C.3.5.10** | समयः- 3 तः 6 |
| दिनाङ्कः –15/10/2019 | सन्दर्भग्रन्थः – ईशकेनोपनिषदौ | |

### प्रथमान्वितिः (Unit 1)

**प्रश्न १ कयोश्चिद् द्वयोः मन्त्रयोः सभाष्यं व्याख्या विधीयताम्।** **१०**

१ असुर्या नाम ते लोका अन्धेन तमसा वृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

२ यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥

३ वायुरनिलममृतमथेदं भस्मान्तं शरीरम्।
ओं क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर॥

**प्रश्न २ अधोलिखितेषु कस्यचिदेकस्य निबन्धात्मकम् उत्तरं प्रदीयताम्।** **१०**

१ आत्मैकत्वज्ञानात् मोक्षः इति वेदान्तपक्षं द्रढयत।

२ ईशावास्योपनिषदः सारांशं स्वशब्दैः निबन्धरूपेण लिखत।

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ कयोश्चिद् द्वयोः मन्त्रयोः सभाष्यं व्याख्या विधीयताम्।** **१०**

१ न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः।
न विद्मो न विजानीमो यथैवतदनुशिष्यात्॥

२ यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

३ यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

**प्रश्न ४ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** **१०**

१ ब्रह्मणः इन्द्रियागोचरत्वं यथाभाष्यं प्रतिपादयत।

२ केनोपनिषदः कर्मकाण्डेन सह सम्बन्धं लिखत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कयोश्चिद् द्वयोः मन्त्रयोः सभाष्यं व्याख्या विधीयताम्।** १०

१ यस्यामतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम्॥

२ इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन् महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।

३ तद्ध तद्वतं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति॥

**प्रश्न ६ अधोलिखितयोः कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत।** १०

१ आत्मनः ज्ञानविषयत्ववादिमतं यथाभाष्यं निराकुरुत।

२ इन्द्रेण देव्या उमाया उपदेशेन कथं ब्रह्मसाक्षात्कारः कृतः इति संवादं लिखत।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानाम् लघूत्तराणि लिखत।** १०

१ ईशिता कः अस्ति सर्वस्य?

२ 'असुर्या' इति पदस्य कोऽर्थः?

३ 'लोकाः' इति पदस्य कोऽर्थः?

४ कः सर्वाणि भूतानि आत्मन्येव अनुपश्यति?

५ शुक्रम् इति पदस्य कोऽर्थः?

६ प्रस्थानत्रय्यां किम् अन्तर्भवति?

७ के अन्धं तमः प्रविशन्ति?

८ अग्नेः 'सुपथा' इति विशेषणं किमर्थम्?

९ ईशावास्योपनिषदि कति मन्त्राः सन्ति?

१० कर्मणा कः बध्यते?

११ जीवः कया विमुच्यते?

१२ केनोपनिषदि कति खण्डाः सन्ति?

१३ शाङ्करभाष्यं केन लिखितम्?

१४ श्रोत्रं केन शृणोति?

१५ ‘प्रैति’ इति क्रियापदस्य कोऽर्थः?